# Naradaproktam Kashimahatmyam

# नारदप्रोक्तं काशीमाहात्म्यम्

## Document Information

Text title : Naradaproktam Kashimahatmyam

File name : kAshImAhAtmyamnAradaproktaM.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 447-463.1||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# नारदप्रोक्तं काशीमाहात्म्यम्

काशीपरतरं क्षेत्रं क्षेत्राणामधिदैवतम् ।
भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥ ४४७॥

तपोदानादिधर्माणामनन्तानां परं फलम् ।
यत्प्राप्त्याऽऽहुश्च सा काशी काश्यते सर्वदा यतः ॥ ४४८॥

परात्परतरं यत्तु तत्परात्परतः शिवः ।
स एव काशी काशीति कथ्यते किं ततोऽधिकम् ॥ ४४९॥

काशी स्मृतापि संसारमूलनिर्मूलनक्षमा ।
सा साक्षात्सेविता शैवैर्मोक्षदा भवति ध्रुवम् ॥ ४५०॥

हन्त्यघं स्मृतिमात्रेण दृष्ट्वा पुण्यं तनोति या ।
सा निर्वाणैकनिलया काशी विश्वेश्वरालया ॥ ४५१॥

यस्यां शिवोऽपि सततं श्रीमद्विश्वेश्वराभिधे ।
लिङ्गे जागर्ति सा काशी कलिकल्मषनाशिनी ॥ ४५२॥

चतुर्दशापि भुवनान्येकतस्तुलितान्यपि ।
काशीकोट्यम्शकोट्यम्शतुल्यानि न कदाचन ॥ ४५३॥

के वा वर्णयितुं शक्ता काशीं मुक्तिप्रदायिनीम् ।
काशीप्रभावो वेदैश्चाप्यभिष्टोतुं न शक्यते ॥ ४५४॥

तिरस्क्रियन्ते ब्रह्माद्याः काशीस्थैर्मशकैरपि ।
अत एतादृशीं काशीं को नु वर्णयितुं क्षमः ॥ ४५५॥

च्यवन्ते ब्रह्मसदनाद्वैकुण्ठादपि वस्तुतः ।
महाप्रलयकालेऽपि न काशीवासिनां च्युतिः ॥ ४५६॥

एकार्णवेऽपि सञ्जाते त्रिशूलाग्रेण काशिका ।
ऊर्ध्वं न याति विश्वेशः सा काशी केनमीयते ॥ ४५७॥

तृणाय मन्यते हीन्द्रं काशीस्थः पुल्कसोऽप्यतः ।
काशीपुरीसमं वस्तु कुत्र केनोपमीयते ॥ ४५८॥

यस्यां भवानी सततं भवभीमभयापहा ।
ददाति परमामृद्धिं सा काशी भुक्तिमुक्तिदा ॥ ४५९॥

यस्यां तनुव्यये जन्तोर्मुक्तिर्हस्तगता ध्रुवम् ।
सद्यो भवति शुद्धस्य सा काशी सेव्यते बुधैः ॥ ४६०॥

काशीनारप्रदानेन पितरः पूर्वमादरात् ।
नारदस्त्वं नारदोऽसीत्युक्त्वा मुक्तास्ततः परम् ॥ ४६१॥

किं वक्तव्यं मया तत्त्वं काश्या या कल्मषापहा ।
एतावदेव यत्काशीतत्त्वं ज्ञातं मयाधुना ॥ ४६२॥

इदं शिवप्रसादस्य लेशोनेत्यवगम्यताम् । ४६३।१।

॥ इति शिवरहस्यान्तर्गते नारदप्रोक्तं काशीमाहात्म्यं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् उग्राख्यः सप्तमांशः । अध्यायः १३ । ४४७-४६३।१॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 447-463.1 ..

Notes:

Devarṣi Nārada देवर्षि नारद details to Himvāna हिमवान about the glories of Kāśī काशी - viz. KāśīMāhātmyam काशीमाहात्म्यम्; and that one can attain Kāśī काशी only by Grace of Śiva शिव i.e. Śivānugraha शिवानुग्रह.

Encoded and proofread by Ruma Dewan

*Naradaproktam Kashimahatmyam*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*